काष्ठिका स्तोत्रं, महापद्यषट्कम् क ख

साधनपंचक यतिपंचके। ख

अपराधभञ्जनस्तोत्रं च ग

नीतिरत्नम् नीतिसारम् घ 2+2

नं० 6 १४-घ

नेदेनत्तेत्रमासूर्यरश्मितं सर्वगमप्यहो । अनुग्रहार्थं लोकानामिति वेदविदो विदुः ॥१५॥
शंभोः शक्तिरियं काशी तेनद्भिन्ना परा चितिः ॥ शिव एव हि जानाति काशिकायाः परं रहं । १६ ।
शिवस्यापि परं मोक्षं काशिका वितनत्वरा । निर्विशेषा च शुद्धा च जडा सेति त्रिधा मता ॥ १७॥
देव्य रूपा जडा काशी मोक्षयेत्सर्वदेहिनः । मूर्तिरूपा तया काशी शुद्धा सा चिन्मयी सती ॥१८॥
दृश्यारूपा स्वमाहात्म्यं स्वयमेव विचारयेत् । निर्विशेषात्मुक्तानां शिवस्य च परागतिः ॥१९॥
कोटिजन्मसहस्रेषु तपोध्यानसमाधिभिः । प्रसादितो शिवो येन स एवं वेत्ति काशिकां ॥२०॥
यस्याः प्रसादाद् द्रहमेव शम्भुर् जानामि शम्भुं सकलात्मभूतं । स्मरामि शम्भुं सकलात्मभूतं ।
स्मरामि शम्भुं प्रणवं शिवं च शिवप्रियां तां प्रणमामि काशीं ॥२१॥ प्रकाशयेत्तया शु
परात्मतत्वं प्रकाशतेऽस्यामिति वाथ काशी । चिन्मात्ररूपापि च गीयते या तां ब्रह्मविद्यां
प्रणमामि काशीं ॥२२॥ यस्यां वसन् जन्तुरुपैति परमं भक्तिं च विश्वेश्वरपादयोर्दृढं । गङ्गा
रूविद्यां परमां गतिं च सा काशिका मे स्तु गतिर्मुमुक्षोः ॥२३॥ सर्वाणि तीर्थानि वसन्ति यस्यां वेदाः

काशी.
स्तो.
3

सदेवा मुनयस्सुमुक्षैर्य । विभूषितायापरयाद्युनद्या साकाशिकामेस्तुगतिर्मुमुक्षोः २४
यावःशिवःस्यात्शिवोपियस्याम् अमङ्गमुक्तमरणाच्चभद्रं । दरिद्र्यापिश्रीपतितुल्यश्चासे
तां काशिकां को नभजेत्सुबुद्धिः २५ । विरक्तियोगादिभवाहि विद्या सद्धर्लभाना हि कलौ
विमुक्तिः । यस्यां मृतस्तां समुपैति जंतुः शिवप्रसादादिति निश्चितं हि ॥२६ अतः सदा सेव
निषेवितव्या मुमुक्षुभिः शंकरराजधानी । स्वधर्मनिष्ठैः कलिकालपंकापेयाच वंद्या
परिकीर्तनीया २७ ये पुण्यशीलाः परिकीर्तयंति काशीं सदैव प्रणमंति भक्त्या । तेषा
महत्पादरजो विभर्मि श्रोत्रोमि नित्यं दययातदान्यान् ॥२८॥ वसंति पापा न हि काशिका
यां वसंति चेदत्र मृतिर्न जायते । मृतिर्भवेच्चेन्न हि यातनात्रयम् तथा चांते परिमुच्यतेऽसौ ॥२९॥
अटो काश्यां पापधर्ममार्गेण वासः पापत्यागः काश्यमाहात्म्यदृष्टिः । देहं गेहं पुत्रमित्रादि
यस्य सर्वं त्वक्तं सोधिकारी महात्मा ३० वासः काश्यां सज्जनानां प्रसंगी गंगास्नानं माप
कर्माहविश्च । भूपेप्रीतिः स्वेच्छया लाभ संतोषो दानं भक्त्यानप्रतिग्राह्यमन्नं ॥३१॥ अष्टौ

वेते यस्य सन्त्येव योगा योगाभ्यासैस्तस्य किं काशिकायां। एवं ज्ञात्वा यो वसेन्न काशिकायां
मयो मुक्तोः स्तोभवेन्नैव चान्यः॥२२॥ काश्यां ह्यनाति पापस्य दाहणा रुद्र यातना। अहो रुद्र
पिशाचत्वं नरेकभ्यापि दुःसहं॥२३॥ तस्मात्पापं न कर्त्तव्यं मनागपि विभोः पुरे। जानंतय
त्नन्मोदन प्रायश्चित्तेन नश्यति॥२४॥ स्थापनं शिवलिंगादेः पंचक्रोशप्रदक्षिणा।
स्नानं दानं दयाखेदः प्रायश्चित्तं महत्स्मृतं॥२५॥ पापमेव हि कर्त्तव्यं मतिरस्ति यदीदृशी।
सुखेनान्यत्र कर्त्तव्यं मही ह्यस्ति महीयसी॥२६॥ यथा कामातुरो राजन्न रेकां रमतिमातरं।
तथा पापकृता काशी रक्षितव्या मुमुक्षुणा॥२७॥ काश्यां मृतानां मुक्तिः स्यान्नेवतिविव
दंतिये। नरकं यांति ते पापाः काकाः गृध्राभवन्त्यथ॥२८॥ तस्मात्सर्वपरित्यज्य श्रोतव्याः
काशिसत्कथा। न विनाश्रवणान्मुण्यं पापं वा वेत्ति कोपि हि २९॥ काश्यां वासः सतां संगो
गंगाम्भः शिवपूजनं। ध्यानं नारायणास्यैतन्सारात्सारे विदुर्बुधाः॥४०॥ कलौ विश्वेश्वरो
देवः कलौ वाराणसी पुरी। कलौ भागीरथी गंगा दानं कलियुगे महत्॥४१॥ गंगावि

काशी॰
स्तो॰३॰
४

श्वेश्वरः काशी जागर्ति त्रितयं यतः। तत्र नैश्रेयसी लक्ष्मीर्लभ्यते चित्रमत्र किं ॥४२॥ न वि
श्वेशसमं लिङ्गं न काशीसदृशी पुरी। मणिकर्णीसमं तीर्थं नास्ति ब्रह्माण्डगोलके ॥ ४३॥
काश्यां लिङ्गान्यनेकानि काश्यां तीर्थान्यनेकशः। तथापि सेव्यो विश्वेशः स्नातव्या म
णिकर्णिका ॥४४॥ यथा भूमितले विप्र पूर्यः संति सहस्रशः। तथा काशीनमं तव्या
कापि लोकत्रये क्वचित् ॥४५॥ अन्यानि मुक्तिक्षेत्राणि काशीप्राप्तिकराणि हि। का
शीं प्राप्य विमुच्येत नान्यथा तीर्थकोटिभिः ॥४६॥ तीर्थार्थं न वहिर्गच्छेद्देवार्थं वा क
दाचन। सर्वतीर्थानि देवाश्च वसन्त्यत्राविमुक्तके ॥४७॥ शशकैर्मशकैः काश्यां
यत्पदं हेलयाप्यते। तत्पदं नाप्यते न्यत्र योगयुक्तापि योगिभिः ॥४८॥ मध्यमेश्व
रमारभ्य यावद्देहलिविघ्नपं। सूत्रं संस्थाप्य तद्दत्तं भ्रामयेन्मण्डलाकृति ॥४९॥
तत्र या जायते रेखा तन्मध्ये क्षेत्रमुत्तमं। काशीति यद्विदुर्वेदास्तत्र मुक्तिः प्रतिष्ठिता ॥ ५०॥
पूर्वतो जाह्नवी पश्चात्पाशपाणिर्गणेश्वरः। असीवरणयोर्मध्ये शुभा वाराणसी मता ॥
॥५१॥

विश्वेश्वराच्चतुर्दिक्षु धनुःशतयुगोन्मितं । अविमुक्तमिति प्रोक्तमन्तर्गृहमथस्थएा ।५२।
गोकर्णेशः पश्चिमे पूर्वतश्च गंगामध्योत्तरे भूतिभूतः । ब्रह्मेशानो दक्षिणे संप्रदिष्टः
तत्प्रोक्तं भवनं विश्वभर्तुः ॥५३॥ इत्थं चतुर्विधं क्षेत्रं प्रशास्तश्रोतसोत्तमं । पंचक्रोशा
त्मकं लिंगं यो वेद स परः शिवः ॥५४॥ य इदं काशिकास्तोत्रं भक्त्या संकीर्तयेत्सदा । स स
र्वपापनिर्मुक्तः सद्यो मोक्षमवाप्नुयात् ॥५५॥ गुणानामेकदेशोयं काशिकायाः प्रकी
र्तितः तेन प्रीणातु भगवान् विश्वेशः काशिकाप्रियः ॥५६॥ इति श्रीपरमहंसपरि
व्राजकाचार्य श्रीरामकृष्णतीर्थपादकिंकरशिष्य श्रीसत्यज्ञाना
नंदतीर्थयतिविरचितं काशिकास्तोत्रं संपूर्णं ॥
शुभम् ॥

महाप ॥ ओम् ॥ अस्थिवद्दधिवच्चैव शंखवद्धकवत्तथा । राजन् तव यशो भाति पुनः
पं । संन्यासिदन्तवत् ॥१॥ कालिदासस्तमं श्लोकं स्वकवित्वस्य गोपकं । लिखित्वा प्रददौ पत्रं
५ कवये शंकराय वै ॥२॥ पठित्वा शङ्करः श्लोकं प्रहसन् कौतुकायतनम् पत्रं करे समादाय
सानंदस्त्वरयानदा ॥३॥ कालिदासेन सहितो भोजराजसभां ययौ । अथ दृष्ट्वा स राजान
माशिषं प्रजगादह ॥४॥ ॥

राजन्नभ्युदयोस्तु शंकरकवे किं पत्रिकायामिदं पद्यं कस्य तवैव
कीर्त्तिरचना ननू पक्वान्तां भवेत । किन्त्वासामरविंदमध्य दरहद्दश ज्ञाकचामरान्दोलनाद्
उद्वेल्लद्भुजवल्लीकङ्कणझणत्कारः क्षणं वार्यतां ॥५॥ महाराजश्रीमन् जगति यशसा
ते धवलिते पयःपारावारं परमपुरुषोयं मृगयते । कपर्दी कैलाशं करिवरमभौमं
कुलिशभृत् कलानाथं राहुः कमलभवनो हंसमधुना ॥६॥ नीरक्षीरे गृहीत्वा सकल
खगपतीन् याति नालीकजन्मा तक्रं धृत्वा करीन्द्रं सकलनिधीन् चक्रपाणिर्मुकुन्दः ।

सर्वोत्तुङ्गत्वशैलान्दहति पशुपतिर्भालनेत्रेण पश्यन् गाम्भात्वत्कीर्त्तिकांता सकलवसुमतीं
भोजराजक्षितीन्द्र ॥ श्रीमद्राजशिखामणेस्तुलयितुं धाता त्वदीयं यशः कैलाशस्तुतिरीक्ष्यतत्र
लघुतां तत्क्षिप्तवान्पूर्त्तये । उक्षाणं तदुपर्युमासहचरं तन्मूर्द्धि गङ्गाधरं तस्याग्रे फणिपुङ्ग-
वं तदुपरिस्फारं सुधादीधितिं ॥ ८ ॥ अपायि मुनिना पुरा पुनररामायि मर्यादया अनारि कपि
ना पुरा पुनरदाहि लङ्कारिणा । अमन्थि मुरवैरिणा पुनरबन्धि लङ्काद्विषा क्व नाम वसुधापते
तव यशोम्बुधिः क्वाम्बुधिः ॥ ९ ॥ स्वस्ति श्री भोजराज त्रिभुवनविजयी धार्मिकः सत्यवादी
पित्रा ते मे गृहीता नवनवतियुता रत्नकोटिर्मदीया । तां त्वं मे देहि शीघ्रं सकलबुधजनैर्ज्ञायते
सत्यमेतत् नो वा जानंति केचिन्नवकृतमिति चेद् देहि लक्षं ततो मे ॥ मागाः प्रस्थपकारकांत
रधिया वैमत्यमाकर्णमे श्रीकर्णाटवसुंधराधिपसुधासिक्तानि सूक्तानि मे । वर्ण्यपेते.
कति नाम नारीवनदीभूगोलविंध्याटवी झंझामारुतमंदमः प्रभृतयस्तेभ्यः किमाप्त
मया ॥ ११ ॥ इति श्रीमहाकवि कालिदासकृतं महापद्यषट्कं समाप्तं ॥ ० ॥

साधन॰
पञ्चकं॰
६

॥ ॐ ॥ वेदोनित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां तेनेशस्य विधीयता
मपचितिः काम्ये मतिस्त्यज्यतां। पापौघः परिधूयतां भवसुखे दोषोनुसंधीयतां आत्मेच्छाव्यव
सीयतां निजगृहात्तूर्णं विनिर्गम्यतां ॥१॥ सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढाधीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यतां। सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुका
सेव्यतां ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यतां ॥२॥ वाक्यार्थश्च विचार्यतां श्रुति
शिरःपक्षः समाश्रीयतां दुस्तर्कात् सुविरम्यतां श्रुतिमतस्तर्कोनुसंधीयतां। ब्रह्मैवास्मि वि
भाव्यतामहरहर्गर्वः परित्यज्यतां देहेहंमतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यतां ॥३॥
क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां स्वाद्वन्नं न तु याच्यतां विधिवशात् प्राप्तेन
संतुष्यतां। शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यतां औदासीन्यमभीप्स्यतां
जनकृपानैष्ठुर्यमुत्सृज्यतां ॥४॥ एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां पूर्णात्मा
सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यतां। प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां।

प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयतां ॥५॥ यः श्लोकपंचकमिदं पठते मनुष्यः संचि
न्तयत्यनुदिनं स्थिरतामुपेत्य। तस्याशु संसृतिदवानलतीव्रघोर तापः प्रशांतिमुपयाति चिति
प्रसादात् ॥६॥ इति श्रीशंकराचार्यविरचितं साधनपंचकं समाप्तं ॥

यति पंचकं

अथ यतिपञ्चकं ॥ वेदान्तवाक्येषु सदा रमन्तो भिक्षान्नमात्रेण च तुष्टिमन्तः।
विशोकमन्तःकरणे रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥१॥ मूलं तरोः केवलमाश्रयन्तः
पाणिद्वयं भोक्तुममन्त्रयन्तः। कन्थामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥२॥
देहादिभावं परिवर्तयन्त आत्मानमात्मन्यवलोकयन्तः। नान्तं न मध्यं न बहिः स्मरन्तः कौपीन
वंतः खलु भाग्यवंतः ॥३॥ स्वानंदभावे परितुष्टिमंतः सुशान्तसर्वेंद्रियवृत्तिमन्तः। अहर्निशं ब्रह्म
सुखे रमन्तः कौपीनवन्तः खलु भाग्यवंतः ॥४॥ पंचाक्षरं पावनमुच्चरंतः पतिं पशूनां हृदि भाव
यंतः। भिक्षाशिनो दिक्षु परिभ्रमंतः कौपीनवन्तः खलु भाग्यवंन्तः ॥५॥
इति श्रीपरमहंसकाचार्य शङ्करभगवत् पूज्यपादकृतं यतिपञ्चकं समाप्तं ॥ ॥

अप ॥ ॐनमःशिवाय॥ ॐ शांतंपद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिणेत्रं।
राध शूलंवज्रञ्चखड्गं परशुमभयदं दक्षिणाङ्गेवहन्तं॥ नागंपाशञ्चघण्टां डमरुकसहितं
भंजन चाङ्कुशंवामभागे। नानालङ्कारदीप्तं स्फटिकमणिनिभं पार्वतीशंभजामि॥ १॥
७ वंदे देवमुमापतिं सुरगुरुं वंदेजगत्कारणं वन्देपन्नगभूषणंमृगधरं वंदेपशूनांपतिं।
7 वंदेसूर्यशशांकवह्निनयनं वंदेमुकुंदप्रियं वंदेभक्तजनाश्रयञ्च वरदं वंदेशिवंशङ्करं॥२॥
आदौकर्मप्रसङ्गात्कलयतिकलुषं मातृकुक्षौस्थितंमां विण्मूत्रामेध्यमध्ये क्वथय
तिनितरां जाठरोजातवेदाः॥ यद्यद्वातत्रदुःखंव्यथयति विषमं शक्यतेकेनवक्तुं।
क्षन्तव्योमेऽपराधःशिव शिव शिव भोः श्रीमहादेव शम्भो॥३॥ बाल्येदुःखातिरेको
मललुलितवपुःस्तन्यपानेपिपासा। नोशक्तोचेन्द्रियेभ्योभवगुणजनिताजंतवो
मांतुदंति॥ नानारोगोत्थदुःखाद्रुदनपरवशःशङ्करंनस्मरामि। क्षन्तव्योमेऽपराधः
शिव शिव शिव भोः श्रीमहादेवशम्भो॥४॥ प्रौढोऽहंयौवनस्थो विषयविषधरैः

पंचभिर्मर्मसंधौ। दृष्टोनष्टोविवेकः स्तनधनयुवतीस्वादुसौख्येनिषण्णः॥ शैवेचिंताविही
नंममहृदयमहो मानगर्वाधिरूढं। क्षंतव्योमेऽपराधः शिव शिव शिव भोः श्रीमहादेव
शम्भो ॥५॥ वार्द्धके चेंद्रियाणां विगतगतमतेश्चाधिदैवादितापैः। पापै रोगैर्वियो
गैस्त्वनवसितवपुषं प्रौढहीनञ्चदीनं॥ मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्या
नशून्यं। क्षंतव्योमेऽपराधःशिवशिवशिवभोः श्रीमहादेवशम्भो॥६॥ नोशक्यंस्मार्तक
र्म प्रतिपदगहनं प्रत्यवायाकुलाढ्यं। श्रौतेवार्ताकथंमे द्विजकुलविहिते ब्रह्ममार्गेचसारे॥
नष्टो धर्मो विचारः श्रवणमननयोः को निदिध्यासितव्यः। क्षंतव्योमेपराधःशिवशिव
शिवभोः श्रीमहादेवशंभो॥७॥ स्नात्वाप्रत्यूषकाले स्नपनविधिविधौ नाहृतंगांगतोयं।
पूजार्थंवाकदाचिद्बहुतरगहनात् खण्डबिल्वैकपत्रं॥ नानीता पद्ममाला सरसि विक
सिता गंधपुष्पैस्त्वदर्थे। क्षंतव्योमेऽपराधःशिवशिवशिवभोः श्रीमहादेवशम्भो॥८॥
दुग्धैर्मध्वाज्ययुक्तैर्घटशतसहितैः स्नापितंनैवलिंगं। नोलिप्तंचंदनाद्यैः कनकविरचितैः

अपरा
धभंज
न:
८

पूजितं न प्रसूनैः ॥ धूपैः कर्पूरदीपैर् विविधरसयुतैर् नैव भक्ष्योपहारैः । क्षंतव्यो मेऽपरा
धः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥९॥ नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्त
मोहांधकारो । नासाग्रे न्यस्तदृष्टिर् विदितभवगुणो नैव दृष्टः कदाचित् ॥ उन्मनावस्थया
त्वां विगतकलिमलं शङ्करं न स्मरामि । क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव
शंभो ॥१०॥ ध्यानं चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो । हव्यं ते लक्षसंख्यैर् हुतवह
वदने नार्पितं बीजमंत्रैः ॥ नो तप्तं गाङ्गतीरे व्रतपरिचरणै रुद्रजाप्यैर् न वेदैः क्षंतव्यो
मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥११॥ स्थित्वा स्थाने सरोजे प्रणवमय
मरुत् कुम्भके सूक्ष्ममार्गे । शांते स्वान्ते प्रलीने प्रकटितगहने ज्योतिरूपे पराख्ये ॥ लिङ्गं
तद्ब्रह्मवाच्यं सकलमभिमतं नैव दृष्टं कदाचित् क्षंतव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शंभो ॥१२॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं प्रत्यायाति गताः
पुनर्न दिवसाः कालो जगद्भक्षकः । लक्ष्मीस्तोयतरंगभंगचपला विद्युच्चलं जीवनं तस्मा